# .. shrIgaNeshamahimnaH stotram ..

# ॥ શ્રીગણેશમહિમ્નઃસ્તોત્રમ્ ॥

## Document Information


Text title : gaNeshamahimnaH stotram
File name : gaNeshamahimnastotra.itx
Location : doc_ganesha
Author : pushpadanta
Language : Sanskrit
Subject : hinduism/religion
Transliterated by : Available at webdunia.com
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Latest update : April 23, 2004
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.



August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીગણેશમહિમ્નઃસ્તોત્રમ્ ॥

શ્રી ગણેશાય નમઃ ।
અનિર્વાચ્યં રૂપં સ્તવન-નિકરો યત્ર ગલિત-
સ્તથા વક્ષ્યે સ્તોત્રં પ્રથમપુરુષસ્યાઽત્ર મહતઃ ।
યતો જાતં વિશ્વં સ્થિતમપિ સદા યત્ર વિલયઃ
સ કીદૃગ્ગીર્વાણઃ સુનિગમનુતઃ શ્રીગણપતિઃ ॥ ૧॥

ગણેશં ગાણેશાઃ શિવમિતિ ચ શૈવાશ્ચ વિબુધા
રવિં સૌરા વિષ્ણું પ્રથમપુરુષં વિષ્ણુભજકાઃ ।
વદન્ત્યેકે શાક્તા જગદુદયમૂલાં પરિશિવાં
ન જાને કિં તસ્મૈ નમ ઇતિ પરં બ્રહ્મ સકલમ્ ॥ ૨॥

તથેશં યોગજ્ઞા ગણપતિમિમં કર્મ નિખિલં
સમીમાંસા વેદાન્તિન ઇતિ પરં બ્રહ્મ સકલમ્ ।
અજાં સાંખ્યો બ્રૂતે સકલગુણરૂપાં ચ સતતં
પ્રકર્તારં ન્યાયસ્ત્વથ જગતિ બૌદ્ધા ધિયમિતિ ॥ ૩ ॥

કથં જ્ઞેયો બુદ્ધેઃ પરતર ઇયં બાહ્યસરણિર્યથા
ધીર્યસ્ય સ્યાત્ સ ચ તદનુરૂપો ગણપતિઃ ।
મહત્કૃત્યં તસ્ય સ્વયમપિ મહાન્ સૂક્ષ્મમણુવદ્
ધ્વનિર્જ્યોતિર્બિન્દુર્ગગનસદૃશઃ કિં ચ સદસત્ ॥ ૪॥

અનેકાસ્યોઽપારાક્ષિ- કરચરણોઽનન્ત-હૃદયસ્તથા
નાનારૂપો વિવિધવદનઃ શ્રીગણપતિઃ ।
અનન્તાહ્વઃ શક્ત્યા વિવિધગુણકર્મૈકસમયે
ત્વસંખ્યાતાનન્તાભિમત- ફલદોઽનેકવિષયે ॥ ૫॥

ન યસ્યાઽન્તો મધ્યો ન ચ ભવતિ ચાદિઃ સુમહતામલિપ્તઃ
કૃત્વેત્થં સકલમપિ ખંવત્ સ ચ પૃથક્ ।
સ્મૃતઃ સંસ્મર્તૄણાં સકલહૃદયસ્થઃ પ્રિયકરો
નમસ્તસ્મૈ દેવાય સકલસુરવન્દ્યાય મહતે ॥ ૬॥

ગણેશાદ્યં બીજં દહન-વનિતા-પલ્લવયુતં
મનુશ્ચૈકાર્ણોઽયં પ્રણવસહિતોઽભીષ્ટફલદમ્ ।
સબિન્દુશ્ચાગાદ્યાઙ્ગણકઋષિછન્દોઽસ્ય ચ નિચૃત્
સ દેવઃ પ્રાગ્બીજં વિપદપિ ચ શક્તિર્જપકૃતામ્ ॥ ૭॥

ગકારો હેરમ્બઃ સગુણ ઇતિ પુનિર્ગુણમયો

દ્વિધાઽપ્યેકો જાતઃ પ્રકૃતિપુરુષો બ્રહ્મ હિ ગણઃ ।
સ ચેશશ્ચોત્પત્તિ-સ્થિતિ- લયકરોઽયં પ્રથમકો
યતો ભૂતં ભવ્યં ભવતિ પતિરીશો ગણપતિઃ ॥ ૮॥

ગકારઃ કણ્ઠોર્ધ્વં ગજમુખસમો મર્ત્યસદૃશો
ણકારઃ કણ્ઠાધો જઠરસદૃશાકાર ઇતિ ચ ।
અધોભાગ ઃ કટ્યાં ચરણ ઇતિ હીશોઽસ્ય ચ તનુ-
ર્વિભાતીત્થં નામ ત્રિભુવનસમં ભૂર્ભુવઃસુવઃ ॥ ૯॥

ગણેશેતિ ત્ર્યર્ણાત્મકમપિ વરં નામ સુખદં
સકૃત્પ્રોચ્ચૈરુચ્ચારિતમિતિ નૃભિઃ પાવનકરમ્ ।
ગણેશસ્યૈકસ્ય પ્રતિજપકરસ્યાસ્ય સુકૃતં
ન વિજ્ઞાતો નામ્નઃ સકલમહિમા કીદૃશવિધઃ ॥ ૧૦॥

ગણેશેત્યાહ્વાં યઃ પ્રવદતિ મુહુસ્તસ્ય પુરતઃ
પ્રપશ્યઁસ્તદ્વક્ત્રં સ્વયમપિ ગણસ્તિષ્ઠતિ તદા ।
સ્વરૂપસ્ય જ્ઞાનં ત્વમુક ઇતિ નામ્નાઽસ્ય ભવતિ
પ્રબોધઃ સુપ્તસ્ય ત્વખિલમિહ સામર્થ્યમમુના ॥ ૧૧॥

ગણેશો વિશ્વેઽસ્મિન્ સ્થિત ઇહ ચ વિશ્વં ગણપતૌ
ગણેશો યત્રાસ્તે ધૃતિ- મતિરનૈશ્વર્યમખિલમ્ ।
સમુક્તં નામૈકં ગણપતિપદં મંગલમયં
તદેકાસ્યં દૃષ્ટેઃ સકલ-વિબુધાસ્યેક્ષણ- સમમ્ ॥ ૧૨॥

બહુક્લેશૈર્વ્યાપ્તઃ સ્મૃત ઉત ગણેશે ચ હૃદયે
ક્ષણાત્ ક્લેશાન્ મુક્તોભવતિ સહસા ત્વભ્રચયવત્ ।
બને વિદ્યારમ્ભે યુધિ રિપુભયે કુત્ર ગમને
પ્રવેશે પ્રાણાન્તે ગણપતિપદં ચાઽઽશુ વિશતિ ॥ ૧૩ ॥

ગણાધ્યક્ષો જ્યેષ્ઠઃ કપિલ અપરો મંગલનિધિ-
ર્દયાલુર્હેરમબો વરદ ઇતિ ચિન્તામણિરજઃ ।
વરાનીશો ઢુણ્ઢિર્ગજવદનનામા શિવસુતો
મયૂરેશો ગૌરીતનય ઇતિ નામાનિ પઠતિ ॥ ૧૪॥

મહેશોઽયં વિષ્ણુઃ સકવિરવિરિન્દુઃ કમલજઃ
ક્ષિતિસ્તોયં વહ્નિઃ શ્વસન ઇતિ ખં ત્વદ્રિરુદધિઃ ।
કુજસ્તારઃ શુક્રો ગુરુરુડુબુધોઽગુશ્ચ ધનદો
યમઃ પાશો કાવ્યઃ શનિરખિલરૂપો ગણપતિઃ ॥ ૧૫॥

મુખં વહ્નિઃ પાદૌ હરિરપિ વિધાતા પ્રજનનં

રવિર્નેત્રે ચન્દ્રો હૃદયમપિ કામોઽસ્ય મદનઃ ।
કરૌ શક્રઃ કટ્યામવનિરૂદરં ભાતિ દશનં
ગણેશસ્યાસન્ વૈ ક્રતુમયવપુશ્ચૈવ સકલમ્ ॥ ૧૬॥

અનર્ધ્યાલંકારૈરરુણ-વસનૈર્ભૂષિત- તનુઃ
કરીન્દ્રાસ્યઃ સિંહાસનમુપગતો ભાતિ બુધરાટ્ ।
સ્થિતઃ સ્યાત્તન્મધ્યેઽપ્યુદિત- રવિબિમ્બોપમ-રુચિઃ
સ્થિતા સિદ્ધિર્વામે મતિરિતરગા ચામરકરા ॥ ૧૭॥

સમન્તાત્તસ્યાસન્ પ્રવરમુનિસિદ્ધાઃ સુરગણાઃ
પ્રશંસન્તીત્યગ્રે વિવિધનુતિભિઃ સાઽઞ્જલિપુટાઃ ।
બિડૌજાદ્યૈર્બ્રહ્માદિભિરનુવૃતો ભક્તનિકરૈ-
ર્ગણક્રીડામોદ-પ્રમુદ-વિકટાદ્યૈઃ સહચરૈ ઃ ॥ ૧૮॥

વશિત્વાદ્યષ્ટાષ્ટાદશ-દિગખિલાલ્લોલમનુવાગ્
ધૃતિઃ પાદૂઃ ખડ્ગોઽઞ્જનરસબલાઃ સિદ્ધય ઇમાઃ ।
સદા પૃષ્ઠે તિષ્ટન્ત્યાનિમિષિદૃશસ્તન્મુખલયા
ગણેશં સેવન્તેઽત્યતિનિકટસૂપાયનકરાઃ ॥ ૧૯॥

મૃગાંકાસ્યા રમ્ભાપ્રભૃતિગણિકા યસ્ય પુરતઃ
સુસંગીત કુર્વન્ત્યપિ કુતુકગન્ધર્વસહિતાઃ ।
મુદઃ પારો નાઽત્રેત્યનુપમપદે દોર્વિગલિતા
સ્થિરં જાતં ચિત્તં ચરણમવલોક્યાસ્ય વિમલમ્ ॥ ૨૦॥

હરેણાઽયં ધ્યાતસ્ત્રિપુરમથને ચાઽસુરવધે
ગણેશઃ પાર્વત્યા બલિવિજયકાલેઽપિ હરિણા ।
વિધાત્રા સંસૃષ્ટાવુરગપતિના ક્ષોણિધરણે
નરૈઃ સિદ્ધૌ મુક્તૌ ત્રિભુવનજયે પુષ્પધનુષા ॥ ૨૧॥

અયં સુપ્રાસાદે સુર ઇવ નિજાનન્દભુવને
મહાન્ શ્રીમાનાદ્યો લઘુતરગૃહે રંકસદૃશઃ ।
શિવદ્વારે દ્વાઃસ્થો નૃપ ઇવ સદા ભૂપતિગૃહે
સ્થિતો ભૂત્વોમાંકે શિશુગણપતિર્લાલનપરઃ ॥ ૨૨॥

અમુષ્મિન્ સન્તુષ્ટે ગજવદન એવાપિ વિબુધે
તતસ્તે સન્તુષ્ટાસ્ત્રિભુવનગતાઃ સ્યુર્બુધગણાઃ ।
દયાલુર્હેરમ્બો ન ચ ભવતિ યસ્મિંશ્ચ પુરુષે
વૃથા સર્વં તસ્ય પ્રજનનમતઃ સાન્દ્રતમસિ ॥ ૨૩ ॥

વરેણ્યો ભૂશુણ્ડિર્ભૃગુ-ગુરુ-કુજા-મુદ્ગલમુખા

હ્યપારાસ્તદ્ભક્તા જપ-હવન-પૂજા-સ્તુતિપરાઃ ।
ગણેશોઽયં ભક્તપ્રિય ઇતિ ચ સર્વત્ર ગદિતં
વિભક્તિર્યત્રાસ્તે સ્વયમપિ સદા તિષ્ઠતિ ગણઃ ॥ ૨૪॥

મૃદઃ કાશ્ચિદ્ધાતોશ્છદ- વિલિખિતા વાઽપિ દૃષદઃ
સ્મૃતા વ્યાજાન્મૂર્તિઃ પથિ યદિ બહિર્યેન સહસા ।
અશુદ્ધોઽદ્ધા દ્રષ્ટા પ્રવદતિ તદાહ્વાં ગણપતેઃ
શ્રુત્વા શુદ્ધો મર્ત્યો ભવતિ દુરિતાદ્ વિસ્મય ઇતિ ॥ ૨૫॥

બહિર્દ્વારસ્યોર્ધ્વં ગજવદન-વર્ષ્મેન્ધનમયં
પ્રશસ્તં વા કૃત્વા વિવિધ કુશલૈસ્તત્ર નિહિતમ્ ।
પ્રભાવાત્તન્મૂર્ત્યા ભવતિ સદનં મંગલમયં
વિલોક્યાનન્દસ્તાં ભવતિ જગતો વિસ્મય ઇતિ ॥ ૨૬॥

સિતે ભાદ્રે માસે પ્રતિશરદિ મધ્યાહ્નસમયે
મૃદો મૂર્તિ કૃત્વા ગણપતિતિથૌ ઢુણ્ઢિસદૃશીમ્ ।
સમર્ચન્ત્યુત્સાહઃ પ્રભવતિ મહાન્ સર્વ સદને
વિલોક્યાનન્દસ્તામ્ પ્રભવતિ નૃણાં વિસ્મય ઇતિ ॥૨૭।
તથા હ્યેકઃ શ્લોકો વરયતિ મહિમ્નો ગણપતેઃ
કથં સ શ્લોકે ડસ્મિન્ સ્તુત ઇતિ ભવેત્ સમ્પ્રપઠિતે ।
સ્મૃતં નામાસ્યૈકં સકૃદિદમનન્તાહ્વયસમં
યતો યસ્યૈકસ્ય સ્તવનસદૃશં નાઽન્યદપરમ્ ॥ ૨૮॥

ગજવદન વિભો યદ્- વર્ણિતં વૈભવં તે
ત્વિહ જનુષિ મમેત્થં ચારુ તદ્દર્શયાશુ ।
ત્વમસિ ચ કરુણાયાઃ સાગરઃ કૃત્સ્નદાતા-
અપ્યતિ તવ ભૃતકોઽહં સર્વદા ચિન્તકોઽસ્મિ ॥ ૨૯॥

સુસ્તોત્રં પ્રપઠતુ નિત્યમેતદેવ સ્વાનન્દં
પ્રતિ ગમનેઽપ્યયં સુમાર્ગઃ ।
સચિન્ત્યં સ્વમનસિ તત્પદારવિન્દં
સ્થાપ્યાગ્રે સ્તવનફલં નતીઃ કરિષ્યે ॥ ૩૦॥

ગણેશદેવસ્યં મહાત્મ્યમેતદ્ યઃ શ્રાવયેદ્વાઽપિ પઠેચ્ચ તસ્ય ।
ક્લેશા લયં યાન્તિ લભેચ્ચ શીઘ્રં સ્ત્રી-પુત્ર-
વિદ્યાર્થ-ગૃહં ચ મુક્તિમ્ ॥ ૩૧॥

॥ ઇતિ શ્રીપુષ્પદન્તવિરચિતં શ્રીગણેશમહિમ્નઃ સ્તોત્રં
સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

.. shrIgaNeshamahimnaH stotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*